# Shri Parvatavardhini Sahasranama Stotram

# श्रीपर्वतवर्धिनीसहस्रनामस्तोत्रम्

## Document Information

Text title : Parvatavardhini Sahasranama Stotram

File name : parvatavardhinIsahasranAmastotram.itx

Category : devii, sahasranAma

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan

Proofread by : Sivakumar Thyagarajan, Rajani Arjun Shankar

Description-comments : See corresponding Namavali

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# श्रीपर्वतवर्धिनीसहस्रनामस्तोत्रम्

ॐ श्रीगणेशाय नमः ।
हरिः ॐ ।
ऋषयः -
सूत श्रुतानि बहुशः पुण्यतीर्थानि ते मुखात् ।
शिवशक्ति- रमाविष्णु-तुष्टानि पृथिवी-तले ॥ १॥

तत्र सेतु-प्रशंसायां यदुक्तं भवता पुरा ।
नाम्नां सहस्रं दिव्यानां चिन्तितार्थैक-साधनम् ॥ २॥

मैत्रावरुणिना प्रोक्तं राघवाय महात्मने ।
तद्वयं श्रोतुमिच्छामो विस्तरेण यथातथम् ॥ ३॥

ब्रूहि नः श्रद्दधानानां तत्फलञ्चापि यादृशम् ।
साधु पृष्टं महाभागाः कथयाम्यथ विस्तरात् ॥ ४॥

नाम्नां सहस्रं दिव्यानां कुम्भजेन यथोदितम् ।
देव्याः पर्वतवर्धिन्याः रामायाद्भुतकर्मणे ॥ ५॥

फलं तस्य च वक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ।
पूर्वं संस्थाप्य रामेशमर्चयित्वा यथाविधि ॥ ६॥

तस्य दक्षिणपार्श्वे च देवीं पर्वतवर्धिनीम् ।
वराभय-कराम्भोजां पद्मकैरव-धारिणीम् ॥ ७॥

चक्रराजोपरि स्थाप्यां महादेवीं मनोन्मनीम् ।
परिवार-समायुक्तां पञ्चावरण-मध्यगाम् ॥ ८॥

अगस्त्य-प्रोक्तविधिना यथाशास्त्रमपूजयत् ।
सर्वोपचारैस्सम्पूज्य देवीं पर्वतवर्धिनीम् ॥ ९॥

ससीतालक्ष्मणो रामः कुम्भजश्चेदमब्रवीत् ।

ब्रह्मन् नाम-सहस्रेण सुवर्णकमलैरहम् ॥ १०॥

पूजयिष्येऽघशान्त्यर्थं देवीं पर्वतवर्धिनीम् ।
तं मह्यं श्रद्दधानाय ब्रूहि नामसहस्रकम् ॥ ११॥

रामेश-वल्लभा येन तुष्टा भवति पूजिता ।
श्रीसूतः -
तत्तस्य वचनं श्रुत्वा सन्तुष्टः कुम्भजो मुनिः ॥ १२॥

देव्या नाम-सहस्रं तु शम्भोर्लब्धमुवाच तम् ।
अगस्त्यः -
परं गुह्यमिदं नाम-सहसमघनाशनम् ॥ १३॥

चिन्तितार्थप्रदं देवी-साक्षात्कारकरन्नृणाम् ।
वक्ष्ये राघव ते भक्त्या लोकोपकृतये तथा ॥ १४॥

अनेनार्चय रामेश-वल्लभां त्वं मनोन्मनीम् ।
तत्प्रसादाद्दाशरथे सर्वान् कामानवाप्स्यसि ॥ १५॥

एतन्नामसहस्रं मे पुरा प्रोवाच शङ्करः ।
श्रीसूतः -
एवमुक्त्वा दाशरथिं कुम्भयोनिर्महातपाः ॥ १६॥

नाम्नां सहस्रं रामाय साक्षादुपदिदेश ह ।
लब्धोपदेशो रामोऽथ यदानर्च महेश्वरीम् ॥ १७॥

प्रीता च देवी रामाय वरान्यान् प्रददौ शुभान् ।
एतन्नाम-सहस्रस्य देव्युक्तं पाठजं फलम् ॥ १८॥

तदहं वः प्रवक्ष्यामि शृणुताव्यग्र-मानसाः ।
आनीय हेमपद्मानि हेमपात्रे निधाय च ॥ १९॥

सीतया सहितो रामः उपविश्यासने शुचिः ।
प्राणायामादिकं कृत्वा कुम्भयोन्युपदेशवत् ॥ २०॥

चतुर्थ्यन्तैर्नामपदैश्चक्रेऽम्बा-पादुकार्चनम् ।
श्रीरामः -
ॐ अजाऽव्ययाऽनादि-बोधाऽनेक-रूपाऽग्निहोत्रिणी ॥ २१॥

अचिन्त्य-विभवाऽनन्त-गुणदाऽघ-विनाशिनी ।

अतिसूक्ष्म-धियाऽऽराध्याऽणिमाद्यष्ट-प्रदायिनी ॥ २२॥

अळिप्रियाऽलिकनेत्रा-ऽमृतवागद्रिकन्यका ।
अर्धचन्द्र-धराऽर्धेशा-ऽमोघपादनिषेवणा ॥ २३॥

अर्थिताऽर्थि-जनाराध्या-ऽव्यक्तार्थैक-प्रकाशिका ।
अहर्पति-निशानाथ-जातवेद-विलोचना ॥ २४॥

अश्वारूढाऽश्विनीपुत्र-वैद्यविद्या-प्रदायिनी ।
अगधन्वि-प्रियाऽनङ्ग-सञ्जीवनमहौषधी ॥ २५॥

अलक्ष्मीनाशदा-ऽऽलक्ष्यावयवा-ऽसुरमर्दिनी ।
अजरामर-सिद्धौघ-निषेवित-पदाम्बुजा ॥ २६॥

अटवीवास-सन्यासि-तापसानन्द-दायिनी ।
अथर्वशिरसि ख्याता-ऽपवर्ग-फलदायिनी ॥ २७॥

अमरी-वृन्द-वन्द्याङ्घ्रि-रयदाऽरण्य-वासिनी ।
अहन्तादि-प्रपञ्चैक-हेतुभूताऽऽदिरात्मिका ॥ २८॥

अखिलागम-वेदोक्त-मन्त्र-सिद्धिप्रदायिनी ।
अजेयाऽसुरवृन्दानाममेयाऽनियतात्मभिः ॥ २९॥

अकळङ्क-कलानाथ-पूर्णबिम्ब-समानना ।
आदिरूपाऽऽकाशवासि-प्रिया-ऽऽदिनिधनातिगा ॥ ३०॥

आत्माराम-जनाराध्या-ऽऽदित्य-कोटिसमप्रभा ।
आचारचतुराऽऽचार्य-मुखज्ञेय-स्वरूपिणी ॥ ३१॥

आजि-गम्भीरनिनद-च्छिन्न-दैत्य-शिरोधरा ।
आतङ्कवर्जिता-ऽऽदेयाऽऽदित्यादि-गणसौख्यदा ॥ ३२॥

आधारभूता जगतामाधिव्याधि-विनाशिनी ।
आनन्दनिलयाऽऽनन्दवर्धिन्यानन्द-दायिनी ॥ ३३॥

आप्यायिन्यापदां हन्त्री नित्याकाश-निवासिनी ।
आदिक्षान्ताक्षरमयी सर्वामय-विनाशिनी ॥ ३४॥

आयताऽऽराम-निलया शयिता चासवप्रिया ।
आदिनाथप्रियाऽऽकार-रहिता-ऽऽकारदायिनी ॥ ३५॥

आशापाशक्लेशहराऽऽहुतिरूपा-ऽध्वरिक्रिया ।
आहाररात्रिर्जगतामायुर्दा-ऽऽरम्भ-सिद्धिदा ॥ ३६॥

आसनस्थाऽऽत्मा जगदामयजात-निवारिणी ।
इच्छाशक्तिप्रदेयत्ता-रहितेषु-शरासना ॥ ३७॥

इतिहासपुराणार्थ-वक्त्री षडसितानना ।
इळेडा-पिङ्गळानाडी वायुसञ्चार-दायिनी ॥ ३८॥

इतिह-योगत्रयाऽग्नि-वासिनी ज्यास्वरूपिणी ।
इन्दुखण्ड-धरेष्वासा विद्येशत्वादिमन्त्रिणी ॥ ३९॥

इशिराहारदेच्छेषुरिषुमत्करपङ्कजा ।
ईश्वरार्धतनूरीशा शश्वदीशित्वदायिनी ॥ ४०॥

ईडितेशान-पञ्चास्यैरीति-भीति-निवारिणी ।
उन्मेष-बुधभा-दीप्तिरुद्यदादित्य-रूपिणी
उक्ता चोद्धतदैतेया प्रोद्गीता सुरकिन्नरैः ।
उद्गीर्णेक्षुधनुःपुष्पबाण-पाशाङ्कुशायुधा ॥ ४१॥

उद्धात-शमनी चेहामुत्र-भाग्यप्रदायिनी ।
उमाऽदनी महापानमुच्छिष्ट-गणपार्चिता ॥ ४२॥

उद्गतोच्छिष्टा मातङ्गी तथैवोच्छिन्नकन्दका ।
उड्डामर-महामन्त्ररूपिण्युद्दण्ड-शूलिनी ॥ ४३॥

उत्थिताराति-शमनी चोद्दण्डासुरमर्दिनी ।
उत्तारिणी भवाम्भोधेरुत्तमाङ्घ्रि-निषेवणा ॥ ४४॥

उन्नतोरोज-कलशोद्धृत-ब्रह्माण्ड-गोळका ।
उपांशु-मन्त्रफलदाऽभ्युपजीव्याऽन्यदैवतैः ॥ ४५॥

उपमा-रहितोद्भूति-स्थितिसंहार-कारिणी ।
उन्मन्यवस्था-विज्ञेयोत्तम-वीर-निषेविता ॥ ४६॥

उरस्सरोपवीताघ्र्योररीकृत-सुखप्रदा ।
उल्लासिन्युल्लसद्वक्त्रोल्लून-पापमहाद्रुमा ॥ ४७॥

उद्वासितारि-भवनोद्वेलामृत-महोदधिः ।
उत्तंसवाद्य-सन्तुष्टा वेगदुःख-निवारिणी ॥ ४८॥

उच्चैःषडासनगतोषत्कालादित्य-सन्निभा ।
उत्क्षेपणादि-कर्मणोक्षवाह-मनोरमा ॥ ४९॥

ऊर्ध्वकेश्यूर्ध्वगतिदोर्जस्वलोर्मि-विवर्जिता ।
ऊनीकृत-सुरारातिरूर्ध्वकाय-मनुप्रिया ॥ ५०॥

ऋणमोक्षप्रदा ऋद्धिः ऋग्वेदोक्त-स्वरूपिणी ।
ऋतवाक्यप्रिया ऋद्धा ऋषिसेव्यर्षिमोक्षदा ॥ ५१॥

एधिन्येकाक्षर-मनुः एकीकृतमहेश्वरा ।
एजिताशेषदेवारिः एतावत्ता-विवर्जिता ॥ ५२॥

एनोराशि-प्रशमनी एकाम्र-तरुमूलका ।
ऐहिकामुष्मिक-फल-प्रदात्र्यैश्वर्य-वर्धिनी ॥ ५३॥

ऐन्दवार्ध-धरैशान-गुणवर्णन-तत्परा ।
ऐरावत-समारूढ-देवराज-नमस्कृता ॥ ५४॥

ऐन्द्रैळबिल-सौभाग्य-दायिन्यैङ्कार-मन्त्रिणी ।
ओङ्कारादिचतुर्वेद-विद्यौषधिपति-प्रभा ॥ ५५॥

ओजस्विन्योजसां राशिरोतसर्वप्रपञ्चनी ।
ओघप्रदौघतटिनी चोङ्कारस्वस्वरूपिणी ॥ ५६॥

औषधं भवरोगस्यौत्तानपादि-पदप्रदा ।
औन्नत्यहन्त्री दैत्यानामौद्भिज्जादि-चतुर्विधा ॥ ५७॥

औपासनादि-सोमान्तं ब्रह्मकर्म-प्रवर्तिनी ।
अन्नपूर्णाऽम्बिकाऽम्बाली चाम्बरान्तरचारिणी ॥ ५८॥

अङ्करूपाऽङ्क-संविष्ट-षडानन-गजानना ।
अङ्गणान्तर-सञ्चारि-सिद्धदेवर्षि-सेविता ॥ ५९॥

अङ्गलिप्ताष्टगन्धाऽङ्गतुष्टिपुष्टि-विधायिनी ।
अङ्गनाऽघार्तिशमनी दयाऽङ्गारकभीतिहा ॥ ६०॥

अन्तःपुरं महेशस्य चान्तःकरणचेतना ।
अन्धकासुर-संहर्त्री चण्डाकार-विनाशिनी ॥ ६१॥

अम्भोजनयनाऽम्भोजसम्भवादि-प्रबोधदा ।
अंसासक्त-धनुर्बाणाऽंशुमत्कोटि-प्रकाशिनी ॥ ६२॥

अक्षमालाङ्कुशधराऽक्षरमाला-स्वरूपिणी ।
अक्षक्रीडा-पराऽस्तीतिवादिनी याचकाञ्जनान् ॥ ६३॥

कचन्यस्त-निशानाथ-शकला कच्छपाकृतिः ।
कनकाम्बर-संवीत-तनुः कनकपादुका ॥ ६४॥

कबरी-भार-विन्यस्त-कल्पद्रुम-सुमालिका ।
कमलाकार-नयना कठोर-कुचमण्डला ॥ ६५॥

कम्बुकण्ठी कर्मसिद्धि-जननी कमलाप्रदा ।
कटीतट-क्वणत्काञ्चि-किङ्किणी-दाम-मण्डिता ॥ ६६॥

कलहंसरवा कद्रूसुत-नाथोपवीतिनी ।
कदळीकाण्ड-चारूरुः करकङ्कण-निस्वना ॥ ६७॥

कल्याणकारिणी कामदायिनी कर्मसिद्धिदा ।
कालकालप्रिया काळी काळाञ्जन-समप्रभा ॥ ६८॥

कासार-क्रीडन-परा काणाद-मत-कोविदा ।
कायातीता किशोरेन्दु-शेखरा कीरधारिणी ॥ ६९॥

कल्मषघ्नी कुलाचारप्रिया कुण्डलिनीक्रिया ।
कुमारी कुण्डलामृष्ट-गण्डा कुहरिणी कुहूः ॥ ७०॥

कुलसुन्दरिका नित्या कुण्डाग्नि-हुतहर्षिणी ।
करुणापूर्णहृदया कुञ्जरानन-वर्धिनी ॥ ७१॥

कुमारजननी कुन्दधारिणी कुञ्चिताविका ।
कर्पूरलवणी कूजत्-कोकिलोद्यान-वासिनी ॥ ७२॥

कूर्माधारा कुरुक्षेत्रवासिनी काञ्चनप्रदा ।
कुन्दाग्र-दशनाकारा कुञ्चिताग्र-शिरोरुहा ॥ ७३॥

कल्हारकुमुदामोदा केकिपिञ्छ-विराजिता ।
क्रूरदैत्य-प्रशमनी क्रोधलोभ-विवर्जिता ॥ ७४॥

कृशोदरी कृपावती क्लेशनाश-विधायिनी ।
क्लिन्ना क्लेश-हरा क्लुप्तिः कुहरान्तर-चारिणी ॥ ७५॥

कुण्ठीकृतसुरारातिः कुक्षिन्यस्तजगत्त्रया ।

खड्गिनी खेटकधरा खादितामर-वैरिणी ॥ ७६॥

खवासा खपुराहारा खेद-पीडा-निवारिणी ।
खद्योत-कोटिरुचिरा खद्योतान्वय-देवता ॥ ७७॥

विद्वत्साधु-कृतानन्दा खण्डिताशेष-पातका ।
खगेश-वाह-सहजा खलपित्तातिदूरगा ॥ ७८॥

गजास्य-जननी गद्यपद्य-विद्या-विनोदिनी ।
गदाबाध-परिध्वंस-हेतु-पादनिषेवणा ॥ ७९॥

गदिता गणगन्धर्व-सिद्धविद्याधरैस्तथा ।
गर्भवास-क्लम-हरा गरवेग-निवारिणी ॥ ८०॥

गळद्यावक-पादाब्जा गगनाम्बर-कामिनी ।
गर्जद्घन-समारावा गहनावास-सेविता ॥ ८१॥

गानप्रिया गारुडिनी गाङ्गतोयार्द्र-मूर्धजा ।
गान्धर्व-शास्त्रनिपुणा गर्वितासुर-घातका ॥ ८२॥

गालवाराधित-पदा गिरिजा गिळितासुरा ।
गीर्गिरीशप्रिया गौरी-गुरुज्ञेया गुहाशया ॥ ८३॥

गुह्या गुहावासनुता गुप्ता विश्वगुणात्मिका ।
गुप्त-त्रयातीत-रूपा गूढतत्त्वा गुहार्चिता ॥ ८४॥

गेया गैरिक-सङ्काशा गोघ्नी गोक्षीर-सन्निभा ।
गोवाहना गोपसुता गोविन्दाग्र-समुद्भवा ॥ ८५॥

गोमती गोधरागारा गोकर्ण-कृतभूषणा ।
गौरी गम्भीर-निनदा गौडविन्ध्याशया गुहा ॥ ८६॥

गोदावरी गदहरा गृहीत-परमायुधा ।
ग्रामणाग्रा सदाग्राह्या गन्धमादन-वासिनी ॥ ८७॥

गाढदुःखहरा गण्ड-पत्रवल्ली-लसन्मुखा ।
घनवृष्टिप्रदा घोरा घर्मरश्मिर्घनाघना ॥ ८८॥

घोरगृहा सदुद्धर्षावासा घोषसुखप्रदा ।
घण्टालसत्कराम्भोजा घुटिकासिद्धि-दायिनी ॥ ८९॥

घृष्टचन्दन-लिप्ताङ्गी घटाकार-पयोधरा ।
घटिताशेष-भुवना घातिनी सुरविद्विषाम् ॥ ९०॥

चतुर्वेद-वचोवेद्या चतुर्वर्गफलप्रदा ।
चक्रराजान्तर-गता चक्रचर्या चतुर्विधा ॥ ९१॥

चतुर्मुखनुताऽनेक-चरिता चर्वण-प्रिया ।
चषकाङ्कित-हस्ताब्जा चरमा चलकुण्डला ॥ ९२॥

चर्माम्बरप्रिया चण्डी चण्डभैरव-सेविता ।
चन्द्रमण्डल-मध्यस्था चण्डमारुत-वेगिनी ॥ ९३॥

चञ्चरीकाढ्य-धम्मिल्ला चम्पक-स्रगलङ्कृता ।
चन्दनागरु-सौगन्ध्या चञ्चच्चामीकराम्बरा ॥ ९४॥

चण्डमुण्डशिरोहन्त्री चतुष्पथ-निवासिनी ।
चतुःपीठान्तरासीना चतुरा चतुरायुधा ॥ ९५॥

चार्वङ्गी चारुवदना चाटु-शङ्करभाषिणी ।
चाम्पेय-कान्ति-रुचिरा चित्रिणी चित्रभूषणा ॥ ९६॥

चित्तानन्दकरी चित्ता चिदानन्द-स्वरूपिणी ।
चिन्मात्रा चितिमध्यस्था चिरन्तन-शिवप्रिया ॥ ९७॥

चिदम्बर-चिरावासा चिद्घना चीर्ण-सद्वृता ।
चीराम्बरा चीर्णतपाः चूतमूल-कृतालया ॥ ९८॥

चूडा-शशाङ्कशकला चूर्णितासुर-मस्तका ।
चारीकृत-महेशाना चेटीभूत-सुराङ्गना ॥ ९९॥

चैत्यायतन-मध्यस्था चैत्रादि-द्वादशाभिधा ।
चोदना चोरशमनी चोरितेश-महाशया ॥ १००॥

चौर्यविद्या चमत्काराकारिणी छत्रधारिणी ।
छलातीता छद्मचरा छलितामर-वैरिणी ॥ १०१॥

छिन्नमुण्डा छिदच्छेद्या छिन्नपाप-महातरुः ।
छिद्र-गोप्त्री छोटमुद्रा छाया छन्दोऽधिदेवता ॥ १०२॥

छन्दो-माता जगद्धात्री जगदानन्द-दायिनी ।
जडबुद्धिप्रिया जन्या जटामण्डल-मण्डिता ॥ १०३॥

जनापवादशमनी जपहोमार्चन-प्रिया ।
जन्ममृत्यु-प्रशमनी जननी जयदायिनी ॥ १०४॥

जरामरण-संहर्त्री जलरूपा जलस्थिता ।
जागरूका जाड्यहन्त्री जातवेद-कलामयी ॥ १०५॥

जातिव्यक्ति-क्रियातीता जातशात्रव-मर्दिनी ।
जातिर्जायाऽजिताऽरन्ध्या जितदैत्या जितश्रमा ॥ १०६॥

जिह्वाहस्ता जीर्णगरा जीर्णविद्याप्रकाशिका ।
जुहूर्जुष्टाखिलसुखा जैमिनीयानुसारिणी ॥ १०७॥

जम्भारि-नतपादब्जा जह्नुकन्या-जलप्रिया ।
जन्तुकोटि-महाबोध-प्रदा जम्बूवनाश्रिता ॥ १०८॥

जृम्भिका जृम्भिणी जृम्भा नीलोत्पलविलोचना ।
जातरूपप्रदा ज्योतिर्जामदग्न्या जयप्रदा ॥ १०९॥

जयश्रीर्जयिनी जेत्री जगदानन्द-वर्धिनी ।
झिल्ली-रणत्-पदयुगा टङ्कहस्ता डबीजिनी ॥ ११०॥

डाकिनी डामरमनुर्डमड्डमरु-नादिनी ।
ढक्का-निनाद-सन्तुष्टा प्राणित्राण-परायणा ॥ १११॥

तन्तुरूपा तपोरूपा तलातलनिवासिनी ।
तरस्विनी तमोतीता तल्पीकृत-महेश्वरा ॥ ११२॥

त्वरिता तामसी तन्त्रातन्त्रिणी तान्त्रिकप्रिया ।
तमाल-श्यामलाकारा तटिदाभा तटाकिनी ॥ ११३॥

तानविद्या तालमयी त्रासितासुर-सैनिका ।
त्रासार्दित-त्राणपरा त्रिनेत्रा वरवर्णिणी ॥ ११४॥

त्रयीविद्या त्रिधाग्निस्था त्रिसर्गात्मा ककुद्वना ।
तिरस्करणिका तीव्रा तीव्र-ज्वालादि-भीषणा ॥ ११५॥

तिरश्चीनेश-गमना तुलाकोटि-कवणत्पदा ।
तुरीया तुन्दिला तुङ्ग-पीठत्रय-निवासिनी ॥ ११६॥

तूणीरिणी तूर्णिगमा  तृणीकृत-महासुरा ।

तृष्णातीता त्रुटिस्तीष्णा तीष्ण-बुद्धि-प्रदायिनी ॥ ११७॥

तेजस्विनी तैलसिक्ता तिलहोमप्रियानना ।
तैत्तिरीय-महाविद्या तन्वी तन्तुस्वरूपिणी ॥ ११८॥

ताण्डवाडम्बरनटी ताळराग-विचक्षणा ।
तम्बुरातन्त्रि-निनदानन्दिनी तारनादिनी ॥ ११९॥

तरुणारुण-सङ्काशा तरुणी तारणक्षमा ।
नीर-बहुल-पाथोधि-सेतुमध्य-निवासिनी ॥ १२०॥

ताम्बूल-विलसद्वक्त्रा तारा-ताटङ्क-मण्डिता ।
स्थानदा स्थगिताऽशेष-भुवना  स्थिति-दायिनी ॥ १२१॥

स्थाणुप्रिया स्थिरा स्थैर्य-राशिः स्थलविशेषिणी ।
स्थूलसूक्ष्मगतिः स्थास्नु-कीर्तिदा स्थावराकृतिः ॥ १२२॥

दळिताशेष-दनुजा दग्धपापा दमप्रिया ।
दर्शनीया दयासिन्धुः दत्तसेव्या दरीस्थिता ॥ १२३॥

दारिद्र-दोष-शमनी दासीभूत-जगत्त्रया ।
दिगम्बरप्रिया दीप्ता दीर्घनेत्रा दुरासदा ॥ १२४॥

दीनबन्धुर्दीर्घकेशी दीप-मालान्तर-स्थिता ।
दीक्षा दीक्षितसन्तप्त-हव्यभोजन-लालसा ॥ १२५॥

दम्भातीत-हृदावासा दन्दशूकेश-धारिणी ।
दंष्ट्रा-कराळ-वदना दण्डितानन्त-दानवा ॥ १२६॥

देवाराध्या देवरूपा देवाराति-निषूदिनी ।
देवस्त्री-वन्दितपदा दैन्य-विध्वंस-कारिणी ॥ १२७॥

दोर्दण्डविधृतानेक-हेतिर्दैत्य-निकृन्तनी ।
दोषापहा दोषदक्षा दोला-खेलन-लालसा ॥ १२८॥

दोषाकर-कलादृष्टा दण्डवाद-नटप्रिया ।
धनुर्विद्या धनाध्यक्षा धनदा धर्मवर्धिनी ॥ १२९॥

धरा धवार्ध-चार्वङ्गी धामदा धामदुर्जया ।
धातुपुष्टिकरी धात्रे वरदा धीरधर्मिणी ॥ १३०॥

धुताळका धूमवती धूळि-धूसरविग्रहा ।
धम्मिल्ल-भार-रुचिरा धराधर-धनुःप्रिया ॥ १३१॥

धराधरकुला नष्टाधारा धैर्य-प्रदायिनी ।
धूर्जटि-प्रिय-सर्वाङ्गी धूमकेतु-भयापहा ॥ १३२॥

धार्या धनाधिपाराध्या धुरीणा धृतिरूपिणी ।
धृताखिल-जगद्धारा दूर्वाराध्या धृतिप्रिया ॥ १३३॥

धारणा धीर्धूतपापा धूमध्वज-निवासिनी ।
नगात्मजा नताशेष-देवता नयवर्तिनी ॥ १३४॥

नरमण्डल-सम्माना नमस्कार-सुखप्रदा ।
नगेन्द्र-शिखरारूढा नागराजोपवीतिनी ॥ १३५॥

नरनारायणाराध्या नाकनायक-वन्दिता ।
नारसिंही नागकन्या-नमस्कृत-पदाम्बुजा ॥ १३६॥

नळिनोदर-सङ्काशा नग्नभैरव-सेविता ।
नटनाथ-प्रिया नाट्य-नादज्ञा नटनायिका ॥ १३७॥

नागाभरण-शोभाढ्या नवरत्न-विराजिता ।
निम्नमध्या निजानन्दा नितम्बप्रथिमावती ॥ १३८॥

नित्या नितान्त-सुखदा निर्विकारा निरामया ।
निहताशेष-पापौघा निषादकुल-तोषदा ॥ १३९॥

निगर्भादि-रहस्याख्या-योगिनी-गणसेविता ।
नामजाति-गुणातीता निर्विकल्पा निरञ्जना ॥ १४०॥

नीतिज्ञा निरयच्छेत्त्री निराधारा जनाश्रिता ।
नित्य-नैमित्तिक-प्रायश्चित्तोपासन-सिद्धिदा ॥ १४१॥

नवावरण-चक्रस्था नवनाथ-निषेविता ।
नवयौवन-मध्यस्था निधिदा निधिसेविता ॥ १४२॥

नितान्त-निर्मल-स्वान्त-निषेव्या नव्यभव्यदा ।
नुन्न-पापा नुताग्नेया नवनीत-गुणान्विता ॥ १४३॥

नयनानन्द-जननी नवार्ण-मनु-नायिका ।
नैसर्गिक-गुणोपेता नदीनदजलेस्थिता ॥ १४४॥

नन्दिनी नन्दिगा नन्द-गोपजा निर्मलाकृतिः ।
नक्षत्र-देवता नाक-नायकार्चित-पादुका ॥ १४५॥

नकुलीश-समाराध्या नियतात्म-सुखप्रदा ।
निर्वाणदा नामजाति-योजनातीत-विग्रहा ॥ १४६॥

पवित्रा परमापद्मा विद्या पर्वतवर्धिनी ।
परमापक्षपाताढ्या पदवी-दर्शका सताम् ॥ १४७॥

पादसेवा-मोक्षदात्री पाताळ-तलवासिनी ।
पापघ्नी पारदा पारावार-मध्य-कृतालया ॥ १४८॥

पालितानेक-भुवना पशुपाश-विमोक्षणी ।
पाखण्ड-खण्डिनी पान्थ-रक्षिका पतिदेवता ॥ १४९॥

पानपात्रकरा पीता सुधापीन-पयोधरा ।
पीयूष-वर्षिणी पीडाहारिणी पिङ्गळाकृतिः ॥ १५०॥

पिशाचपति-संसेव्या परावरविदानता ।
पुण्यापुण्य-जनाराध्या पणिनी पुण्यवर्धिनी ॥ १५१॥

पुराणपुरुषाराध्या पुरुषार्थ-प्रदायिनी ।
पूर्णामृता पूर्णसुखा पूर्णचन्द्र-निभानना ॥ १५२॥

पूर्वर्षि-विदिता पूज्या पृतनापति-जन्मभूः ।
पृथिव्यादि-प्रसूवृत्ता पूतना-भीति-नाशिनी ॥ १५३॥

प्रसिद्धा प्राणदा प्रांशुः प्राचीनमुनि-भाविता ।
प्रशस्त-भाग्यदा प्राज्ञा तैजसातीत-रूपिणी ॥ १५४॥

प्रेतारूढा पानपरा पुराणा मधुमोदिता ।
स्फटिकाच्छ-तनुः स्फीता स्फार-स्फुरित-लोचना ॥ १५५॥

स्फुट-पद्म-पद-द्वन्द्वा स्फोटितारि-शिरोघटा ।
फलदा फुल्ल-पद्माभा फणिराज-शिरःस्थिता ॥ १५६॥

फलमूलकराफल्गु-षड्कार-मनु-पल्लवा ।
बलदा बलिसन्तुष्टा बहुशक्ति-गणान्विता ॥ १५७॥

बद्ध-चन्द्रकला-शीर्षा बर्बराळक-मण्डिता ।

बालग्रह-प्रशमनी बाधिताखिल-पातका ॥ १५८॥

बाला बालकुचद्वन्द्वा वटुक-त्रयसेविता ।
बाणहस्ता बीजरूपा बिन्दुनाद-कलादिका ॥ १५९॥

बिम्बितानेक-भुवना बुद्धिदा बुद्धिवर्धिनी ।
बुभुक्षा-शान्तिजननी बह्वन्न-रस-दायिनी ॥ १६०॥

बहिष्कृत-दुराचारा बन्धमोक्ष-विधायिका ।
ब्रह्मज्ञा ब्रह्मजननी ब्रह्मज्ञानैककारिणी ॥ १६१॥

ब्रह्मकर्म-प्रतिष्ठात्री ब्राह्मी ब्राह्मणदेवता ।
बृहस्पति-समाराध्या बृहती बृहदाकृतिः ॥ १६२॥

भगमाला भगाकारा भगगुह्या भगोदरी ।
भगयोनिर्भाग्यदात्री भाललोचन-मण्डिता ॥ १६३॥

भिन्नासुखा भूतधात्री भेरुण्डा भयहारिणी ।
भूचक्र-कोणनिलया भैरवाष्टक-सेविता ॥ १६४॥

भवरोग-प्रशमनी भवभूतिर्भवप्रिया ।
भिक्षुकाराधित-पदा भिक्षादान-विशारदा ॥ १६५॥

भक्ष्य-भोज्य-प्रिया भोक्त्री भाण्डीर-भणिति-प्रिया ।
भिंदिपालायुधा भ्रान्ति-हारिणी भ्रामरी भृगुः ॥ १६६॥

भ्रमद्भ्रमर-धम्मिल्ला भ्राजिष्णुर्भोजनप्रिया ।
भाट्टदर्शन-सन्तुष्टा भीमभैरव-निस्वना ॥ १६७॥

मत्तमातङ्ग-गमना मधुमत्ता मदोत्कटा ।
मनस्तोषकरी मन्दहासा मन्मथमालिनी ॥ १६८॥

मलघ्नी मधुराकारा मनुनीति-प्रकाशिका ।
माधवानन्ददा मान्या मातङ्गी मानवर्जिता ॥ १६९॥

मालाधरी मातृरूपा मालती-कुसुमप्रिया ।
महिषान्तकरी माता मातृका-हारधारिणी ॥ १७०॥

माकन्द-मञ्जरीहस्ता मोहिनी माधवाग्रजा ।
माषान्नभोक्त्री माषाद-मान्या माक्षिक-तर्पणा ॥ १७१॥

मिथुनीकृत-रामेशा मिथ्याज्ञान-विनाशिनी ।
मीनकेतन-वन्द्याङ्घ्रिः मुनिमानस-मोददा ॥ १७२॥

मुदालोकन-सन्तुष्टा मुद्गरायुध-भीषणा ।
मूलाधार-स्थितिकरी मूढजीव-प्रबोधदा ॥ १७३॥

मेध्या मेघप्रिया मेष-वपाहुति-मुदञ्जिता ।
मेदिनी मोदसन्तुष्टा मोदकाहार-मोदिनी ॥ १७४॥

माया मन्दारनिलया महाविद्येश्वरी मृदुः ।
यज्वविद्या यन्त्ररूपा यागसिद्धि-विधायिका ॥ १७५॥

याचमानार्ति-शमनी यतचित्त-कृपावती ।
यवाहुतिप्रिया यक्ष्म-नाशिनी युक्तशङ्करा ॥ १७६॥

यमबाधा-प्रशमनी यमाद्यष्टाङ्ग-योगदा ।
योगिवृन्दप्रिया योग्या युक्त-सायक-कार्मुका ॥ १७७॥

युद्धावनी-दुराधर्षा यावकात्त-पदाम्बुजा ।
रघुवंश-भवाराध्या राम-काम-प्रदायिनी ॥ १७८॥

राकेशवदना रागवती रमणमूर्तिषु ।
रचितानेक-भुवना रण-कङ्कट-दुर्जया ॥ १७९॥

रत्न-काञ्चन-भूषाढ्या रक्षोघ्नी रामसेविता ।
रुद्राक्ष-हृष्टा रुद्रेशा रूपलावण्य-शालिनी ।
रजताद्रि-कृतावासा रक्षिताशेष-निर्जरा ॥ १८०॥

रौद्रास्त्रविद्या रम्भादि-नटीनटन-लम्पटा ।
लसन्मुख-महापद्मा लक्ष्य-लक्षण-वर्जिता ॥ १८१॥

ललिता लघिमा लक्ष्मी-दान-शौण्डा लयप्रदा ।
लास्यतुष्टा लताकारा लासिनी लोल-लोचना ॥ १८२॥

लोकातीता लोकमाता लोकालोकाचल-स्थिता ।
लेलिहानाग्र-रसना लाकिनी लुब्धकप्रिया ॥ १८३॥

लङ्केश-वध-संज्ञाता महापातक-नाशिनी ।
वरदा वश्यकरिणी वाग्देवी विमलाकृतिः ॥ १८४॥

वर्धितानन्त-विभवा वनदुर्गा वनेचरी ।

वारिराशि-तटावासा वामा वामागम-प्रिया ॥ १८५॥

विशिष्ट-पुण्य-फलदा वीतराग-मुनिप्रिया ।
विद्याविनोद-निपुणा विचित्रा विजया वियत् ॥ १८६॥

वेदान्तवेद्या वैराग्य-लभ्या वैभवदायिनी ।
वीरवेष्टित-पादाब्जा वेताळ-गणवन्दिता ॥ १८७॥

शरकार्मुक-हस्ताब्ज-शमितासुर-नायका ।
शमादि-सम्पदासाध्या शतकोटि-स्वरूपिणी ॥ १८८॥

शातोदरी शुभालोका शुचिः शुचिजनप्रिया ।
शुद्धिप्रिया शुद्धिदात्री शूलिनी शौर्यशालिनी ॥ १८९॥

शङ्खिनी शाकिनी शोकमोह-विध्वंस-कारिणी ।
शोचिष्केश-मुखी शोभा शुक्रशाप-विमोचनी ॥ १९०॥

श्रुत्यर्थ-निपुणाराध्या श्रीप्रदा श्रान्ति-नाशिनी ।
श्रीकण्ठवल्लभा श्लाघ्या शेषाशेष-मुखस्तुता ॥ १९१॥

श्रौतकर्मठ-प्रश्वासा शैव-मार्गाधिदेवता ।
षडाधारादि-निलया षडानन-दयापरा ॥ १९२॥

षडूर्मिरहिता षोढान्यास-सिद्धि-विधायिका ।
षोडशी षोडशाकारा विद्वद्-दर्शन-दायिका ॥ १९३॥

सर्वलोक-समाराध्या सामगान-परायणा ।
सिद्धिः सिद्धान्त-संवेद्या सिद्धविद्याधरस्तुता ॥ १९४॥

शुम्भहन्त्री सुखकरी सुरासुर-नमस्कृता ।
सुलभा सेतुवासानां सेतुरक्षा-विधायिनी ॥ १९५॥

सन्दर्शित-स्वस्वरूपा संशय-ध्वंस-कारिणी ।
सौन्दर्य-शालिनी सर्वसौभाग्य-प्रद-पादुका ॥ १९६॥

हरप्रिया हयारूढा हाटकोत्तम-वर्णिनी ।
हलाहलोर्मि-शमनी हिमवत्कुल-वर्धिनी ॥ १९७॥

ह्रीमती हेरम्बमाता हुङ्कार-हत-दानवा ।
हिरण्यगर्भ-प्रमुख-प्रबोध-सुखदायिनी ॥ १९८॥

क्षमावती क्षुण्णदैत्या क्षुत्तृण्मृत्यु-विनाशिनी ।
क्ष्वेडोर्मि-घूर्णितेशान-निजस्पर्श-सुखप्रदा ॥ १९९॥

क्षार-दाक्षिण-पाथोधि-सेतुमध्य-निवासिनी ।
क्षीणदोष-जनाराध्या दिव्य-हाटक-पादुका ॥ २००॥

श्रीसूतः
इत्येतैर्नामभिश्चक्रे रामोऽम्बा-पाद-पूजनम् ।
ततःप्रीता महादेवी रामं प्रोवाच पार्वती ॥ २०१॥

तस्या मूर्तेर्विनिष्क्रम्य दिव्य-विग्रह-धारिणी ।
पश्यतां सर्वदेवानां वानराणाञ्च पश्यताम् ॥ २०२॥

श्रीदेवी -
राम प्रीतास्मि ते भक्त्या हेम-पद्मार्चनादपि ।
सहस्रनाम-पाठेन वरं वृणु यदीप्ससि ॥ २०३॥

श्रीसूतः
तदाश्चर्यकरं दृष्ट्वा रूपं तस्या रघूद्वहः ।
उवाच परया भक्त्या प्रणतो दण्डवद्भुवि ॥ २०४॥

श्रीरामः
धन्योऽस्मि कृतकृत्योऽस्मि गताघोऽस्मि महेश्वरि ।
अतः परतरः को वा वरस्त्वद्दर्शनाधिकः ॥ २०५॥

तथापि प्रार्थये मातः लोकोपकृतये शिवे ।
वरं त्वत्तो महादेवि सर्वजीव-दयापरे ॥ २०६॥

यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ।
तावत्त्वं मामके सेतौ गन्धमादन-मूर्धनि ॥ २०७॥

नित्यं सान्निहिता भूत्वा हराघं सर्वदेहिनाम् ।
त्वद्दर्शनवतामम्ब वर एष वृतो मया ॥ २०८॥

श्रीसूतः
तच्छ्रुत्वा वचनं तत्र राघवस्य महात्मनः ।
पुनः प्रोवाच सन्तुष्टा रामं पर्वतवर्धिनी ॥ २०९॥

श्रीदेवी -

एवमस्तु महाबाहो राक्षसेश-निकृन्तन ।
स्थास्ये नित्यं सन्निहिता गन्धमादन-पर्वते ॥ २१०॥

मम प्रसादात्त्वं गच्छ पुरीं पूर्वज-पालिताम् ।
अयोध्यां विजयी श्रीमान् पुत्रवांश्च भविष्यसि ॥ २११॥

एतन्नाम-सहस्रं मे पठ नित्यं समाहितः ।
तेनाहं तव दास्यामि सर्वान् कामान्मनोगतान् ॥ २१२॥

वर्षाणामयुतं साग्रं कृत्वा राज्यमकण्टकम् ।
अनेन वर्त्मना गच्छ वैकुण्ठं सपुरीजनः ॥ २१३॥

एतन्नाम-सहस्रं मे यः पठिष्यति मानवः ।
राम वक्ष्ये फलं तस्य शृणु राक्षस-कृन्तन ॥ २१४॥

एका प्रतिकृता येन यत्रकुत्रापि तिष्ठता ।
सेतुस्नान-फलं तस्य भवेत् पातक-नाशनम् ॥ २१५॥

दश प्रतिकृता राम सेतुयात्रा भवेद् दृढम् ।
मासमात्रं क्रमेणैतत् यः पठेत्सुसमाहितः ॥ २१६॥

तस्याहं सकलाभीष्टं धर्मं कीर्तिञ्च निर्मलाम् ।
सेतुवासं सदाकालं प्रदास्ये रघुनन्दन ॥ २१७॥

षण्मासं पाठतः श्रीमान् जायते मानवो भुवि ।
सेतावागत्य रामेशं माञ्च संसेव्य भक्तितः ॥ २१८॥

धनुष्कोटौ नरः स्नात्वा सन्निधौ मम यः पठेत् ।
वर्षमेकं क्रमेणैव पुत्रवान् भवति ध्रुवम् ॥ २१९॥

रोगेभ्यो मुच्यते सद्यः कुष्ठेभ्योऽपि विमुच्यते ।
ऋण-त्रय-विमुक्तस्सन् ब्रह्मभूयाय कल्पते ॥ २२०॥

सेतौ च यत्र कुत्रापि नित्यमेतत्पठन्नरः ।
मद्रूपी जायते राम नात्र कार्या विचारणा ॥ २२१॥

यस्तद्वेष्टि स मा द्वेष्टि तत्प्रियो यस्स मे प्रियः ।
शत्रवस्तत्र काकुत्स्थ प्रळयं यान्ति सर्वतः ॥ २२२॥

शापानुग्रह-सामर्थ्यं तस्यैव धरणीतले ।
तस्मान्नाम सहस्रं मे राम त्वं पठ सर्वदा ॥ २२३॥

न देयं दुर्जनायैतद्देयं शिष्याय साधवे ॥ २२४॥

श्री सूतः -
इत्युक्त्वा राघवं देवी साक्षात्पर्वतवर्धिनी ।
अन्तर्दधे शिलामय्यां मूर्तौ लोकस्य पश्यतः ॥ २२५॥

एतत्पर्वतवर्धिन्याः प्रोक्तं नामसहस्रकम् ।
तत्पाठ-फलमप्युक्तं किमन्यत् श्रोतुमिच्छत ॥ २२६॥

इति श्रीपाद्मे पुराणे शतकोटि-संहितायां उत्तरखण्डे सूतऋषिसंवादे तीर्थप्रशंसायां पर्वतवर्धिनी-सहस्रनाम-स्तोत्रकथनन्नाम द्विशतैकाशीतितमस्सर्गः ॥

हरिः ॐ ।

The sahasranAmastotra is not found in the known text of padmapurANa although the manuscript says so. It is possible that it is either wrongly attributed or was found in some manuscript from which the linked handwritten text was prepared. Send any additional information you find elsewhere.

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, Rajani Arjun Shankar

*Shri Parvatavardhini Sahasranama Stotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*